दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-277 | 1 | जुलाई 27, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़शुक्लत्रयोदशी
श्रावण 11 प्रविष्टांशः मङ्गलमयः भवेत्

2 राष्ट्रमण्डल-क्रीडासु मीराबाई-चानू-वर्यायाः स्वर्णिमं प्रदर्शनम्: भारतेन जितं प्रथमं स्वर्णपदकम्

3 शिक्षक-दिवसात् पूर्वं नूतन-परिसर-प्रणाल्याम् भविष्यति निर्णयः, मुख्यमंत्रिणः सुक्खोः बृहती घोषणा

5 त्यागपत्रात् अग्रे..........! राष्ट्रीय-शिक्षा-परिष्कारात् राष्ट्रहितं यावत्- श्रीनिवासः वरखेड़ी

## केन्द्रीयमन्त्री प्रल्हादजोशी शिक्षामन्त्रिरूपेण कार्यभारं स्वीकृतवान्



केन्द्रीयमन्त्री प्रल्हादजोशी शिक्षामन्त्रिरूपेण कार्यभारं स्वीकृतवान्। धर्मेन्द्र प्रधानस्य त्यागपत्रस्यानन्तरं श्री-जोशी वर्यः ह्यः अस्मिन् पदे नियुक्तः अभवत्। श्रीजोशी उपभोक्तृकार्यं, खाद्यं तथा सार्वजनिकवितरणं, नूतनं तथा पुनर्नवीकरणीय ऊर्जा इत्येतानि विभागानि अपि निरन्तरतया निर्वहिष्यति। कार्यभारं स्वीकृत्य शीघ्रमेव, सः विविधयोजनानां, प्रमुख उपक्रमाणां च कार्यान्वयनस्य मूल्याङ्कनं कर्तुं शिक्षा मन्त्रालयस्य समीक्षा-सभायाः अध्यक्षतां कृतवान्। शिक्षा राज्यमन्त्री जयंत चौधरी, मन्त्रालयस्य अनेके वरिष्ठाः अधिकारिणः च अस्यां सभायां उपस्थिताः आसन्।

## जम्मू-कश्मीर-राज्ये शासन-पक्षेण समादिष्टं यत् सम्प्रति प्रवृत्त-अतिवृष्ट्या यानि पाठशाला-भवनानि असुरक्षितानि क्षतग्रस्तानि वा सञ्जातानि, तानि सद्यः पिहितानि क्रियन्ताम्-मण्डलायुक्तः रमेश-कुमारः

जम्मू-कश्मीर-राज्ये शासन-पक्षेण समादिष्टं यत् सम्प्रति प्रवृत्त-अतिवृष्ट्या यानि पाठशाला-भवनानि असुरक्षितानि क्षतग्रस्तानि वा सञ्जातानि, तानि सद्यः पिहितानि क्रियन्ताम्; यावत् च आवश्यक पुनरुद्धार कार्याणि न पूर्यन्ते, तावत् तेषाम् उपयोगः सर्वथा वर्जितो भवेत्। जम्बू-मण्डलस्य मण्डलायुक्तः रमेश-कुमारः आपत्तिं समीक्षितुम् एतान् कठोर-निर्देशान् प्रासारयत्। अत्रान्तरे, अस्मिन्नेव मासे नवदश-दिनाङ्कात् आरभ्य पुञ्छ-राजौरी-डोडा-रामबन-जनपदेषु अतिवृष्टि-सम्भूतासु आपत्सु ऊनत्रिंशत् जनाः मृत्युमुपगताः, षट् जनाः च सम्प्रति यावत् अज्ञाताः सन्ति। जुलाई मासस्य एकोनत्रिंशत्-त्रिंशत्-दिनाङ्कयोः पुनः अति-वृष्टेः पूर्वानुमानम् आलोक्य, आपद्-ग्रस्तेषु संवेदनशीलेषु क्षेत्रेषु च अत्यावश्यक वस्तूनां पर्याप्त-सञ्चयं सुनिश्चेतुं जनपद-प्रशासनानि समादिष्टानि सन्ति।

## 'कारगिल-विजय-दिवसावसरे प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रस्य अतुल्य-पराक्रमिणः शौर्य-पुरुषान् ससम्भ्रमं सस्मार



कारगिल-विजय-दिवसावसरे प्रधानमन्त्री प्रभृतितयः हुतात्मवीरेभ्यः श्रद्धांजलिं समार्पितवान् । 'कारगिल-विजय-दिवसावसरे प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रस्य अतुल्य-पराक्रमिणः शौर्य-पुरुषान् ससम्भ्रमं सस्मार। तेन उद्घोषितं यत् भारतम् अद्य निरन्तरं नूतनान् उच्च शिखरान् आरोहति, तत् यथा सैन्य उत्पादने, सैन्य-निर्याते, अथवा मित्र-राष्ट्रैः सह राजनैतिक-सहयोगे भवतु । 'मन की बात' इति कार्यक्रमे देशवासिनः सम्बोधयन् श्रीमोदी आह यत् अद्य 'जुलाई'-मासस्य षड्विंशतिः दिनाङ्को वर्तते, यो हि सा तिथिः यस्याः स्मरणाय कस्यापि पञ्चाङ्गस्य आवश्यकता नैव भवति, यतो हि अद्य सम्पूर्ण राष्ट्रं कारगिल-विजय-दिवसः परिपाल्यते। श्रीमोदी न्यगादीत् यत् भारतम् अश्रान्तं स्वकीयस्य प्राविधिक-सामर्थ्यस्य सुदृढीकरणं विदधाति। तेन भारतीय-नौसेनायाम् 'आई.एन.एस. महेन्द्रगिरि' इति पोतस्य नूतन-प्रवेशः विशेषतः श्लाघितः। प्रधानमन्त्रिणा प्रोक्तं यत् गत रविवासरे 'विक्रम-१' इति उपग्रह प्रक्षेपकस्य सफल प्रक्षेपणानन्तरं प्रत्येकं भारतीयः गर्व-गौरवेण परिपूर्णः अस्ति। 'कैच् द रेन्' इति- वर्षा-जल-सङ्ग्रहः अभियानमधिकृत्य भाषमाणः श्रीमोदी सहर्षम् अब्रवीत् यत् 'जुलाई'-मासस्य चतुर्थ-दिनाङ्कात् आरभ्य सम्पूर्ण देशे विशिष्टं एकम् राष्ट्र-व्यापी अभियानम् अविरतं प्रचलति। 'मन की बात' इति मनोगतं कार्यक्रमे प्रधानमन्त्री अवोचत् यत् कतिपय-दिवसेभ्यः पूर्वं 'ग्लास्गो' नगरे प्रारब्धासु 'राष्ट्रमण्डल-क्रीडासु' सहभागिनं प्रति एकं क्रीडकं प्रति-एकः भारतीयः जयघोषं करोति। अनेनैव सह तेन 'विज्ञान-ओलम्पियाड्'-स्पर्धानाम् उल्लेखो विहितः, यत्र विपुला सङ्ख्यकानां छात्राणां सहभागिता भवति। अस्मिन् संस्करणे प्रधानमन्त्रिणा काश्मीरस्य पारम्परिक 'वागु' कटस्य चर्चा कृता। श्रीमोदिना प्रोक्तं यत् देशः सम्प्रति 'लोकल-फार-वोकल' (स्थानीय-वस्तूनां प्रोत्साहनम्) इति मन्त्रेण सह अग्रे सरति। गणेशोत्सव-अवसरे पी. ओ.पी. निर्मित-प्रतिमानां स्थाने स्वादेशी-मृत्तिका-निर्मितानां गणेश-प्रतिमानाम् एव अर्चनं विधातुं तेन पुनरपि आह्वानं कृतम्। अवधेयं यत्, श्वः 'जुलाई'-मासस्य सप्तविंशे दिनाङ्के 'भारत-रत्न'-विभूषितस्य डा. ए. पी. जे. अब्दुल कलामस्य पुण्य-तिथिः अस्ति। प्रधानमन्त्रिणा अभिहितं यत् डा. कलामस्य व्यक्तित्वे बहवः प्रेरणादायिनः पक्षाः समाहिताः आसन्, तथापि 'शिक्षकस्य' भूमिका तस्य हृदयस्य निभृत-समीपे आसीत्। सम्बोधनस्य समापने अगस्त-मासस्य पञ्चदशे दिनाङ्के आचरणीयस्य स्वातन्त्र्य-दिवसस्य चर्चा कुर्वन् तेन सर्वेभ्यः स्वकीयाः नूतनाः विचाराः परामर्शाश्च 'माई-गव्' मञ्चे प्रेषयितुम् साग्रहं प्रार्थितम्।

क्रमशः ६ पृष्ठे...

## कृष्ण-सागर-मार्गेषु पोत-सेवायाः पूर्वं सुरक्षा-संकटं परीक्षणाय विदेश मन्त्रालयस्य भारतीयानां कृते तीव्र-संचेतना



विदेश-कार्य-मन्त्रालयेन एका सुरक्षा-परामर्श-विज्ञप्तिः प्रसारिता, यस्यां कृष्ण-सागर-क्षेत्रे सञ्चरत्सु अथवा तद्-द्वारा प्रवहत्सु वाणिज्यिक पोतेषु सेवा नियोजनम् इच्छन्तः भारतीय नागरिकाः एतादृश-दायित्व-स्वीकरणात् पूर्वं प्रवृत्त-सुरक्षा-सङ्कटस्य सूक्ष्मेक्षिकया परीक्षणं कुर्युः इति साग्रहम् उद्बोधिताः। परामर्श पत्रे स्पष्टीकृतं यत् ये जनाः एतादृशं सेवा-कार्यम् अङ्गीकुर्वन्ति, तैः अतिशयित-सावधानता परिपालनीया। मन्त्रालयेन प्रोक्तं यत् सशस्त्र सङ्घर्षस्य कारणात् कृष्ण-सागरस्य तस्य समीपवर्तिनां सामुद्रिक-क्षेत्राणाञ्च सुरक्षा-स्थितिः अतीव अस्थिरा आशङ्काकुला च वर्तते।

## सुभाषितम्

**कामं कामयमानस्य,**
**यदा कामः समृध्यते।**
**अथैनमपरः कामः,**
**तृष्णा विध्यति बाणवत्।।**
**(महाभारत, अनु. पर्व- ९३/४३)**

अर्थात्- कामना करने वाले मनुष्य की एक कामना जब पूर्ण होती है, तो दूसरी कामना उपस्थित हो जाती है। यह तृष्णा बाण के समान तीक्ष्ण प्रहार करती है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति


कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## राष्ट्रमण्डल-क्रीडासु ऋषिकान्त-सिंह-चनम्बम् षष्ठी-किलोग्राम भारोत्तलन-स्पर्धायाम् रजत पदकं समुपार्जितवान्





अद्यत्वे प्रचलितासु राष्ट्रमण्डल-क्रीडासु भारतस्य ऋषिकान्तसिद्धू चनम्बम् इत्येषः ग्लास्गो-नगरे पुरुषाणां षष्ठी कि. ग्रा. मितायां भारोत्तोलन-स्पर्धायां रजतपदकं प्राप्तवान्।

# परीक्षा-परिष्काराय नन्दन-निलेकणि-महोदयस्य अध्यक्षतायां उच्च-स्तरीय-समित्याः गठनम्: प्रधानमन्त्री नरेन्द्रमोदी



प्रधानमन्त्री नरेन्द्रमोदी रविवासरे पुनरेकवारं छात्रेभ्यः नवीनं दूरदृश्य-सन्देशं (वीडियो संदेश) प्रेषितवान्। अस्मिन् दूरदृश्ये प्रधानमन्त्रिणा मोदिना ज्ञापितं यत् परीक्षा-परिष्काराय (एग्जाम रिफॉर्म) प्राविधिक-विशेषज्ञस्य (टेक्नोलॉजी एक्सपर्ट) नन्दन-निलेकणि-महोदयस्य नेतृत्वे एका उच्च-स्तरीय-समितिः (हाई पावर्ड कमेटी) गठिता अस्ति। 'नीट'-प्रश्नपत्र-प्रकटन (पेपर लीक) विवादस्य मध्ये छात्रेभ्यः प्रधानमन्त्रिणः मोदिनः एषः तृतीयः दूरदृश्य-सन्देशः अस्ति। प्रथमः दूरदृश्य-सन्देशः २३ जुलाइ-दिनाङ्कस्य रात्रौ ११:५२ वादने प्रसारितः आसीत्, यस्मिन् तेन उक्तं यत् मन्त्रिमण्डलस्य उपवेशने प्रश्नपत्र-प्रकटनम् अधिकृत्य कठोरः निर्णयः ग्रहीष्यते। अस्य अनन्तरम् अग्रिमे एव दिने तेन अपरः दूरदृश्य-सन्देशः प्रसारितः, यस्मिन् तेन छात्रेभ्यः धन्यवादाः दत्ताः। अधुना रविवासरे प्रधानमन्त्रिणा मोदिना १ कला २० क्षणस्य (1 मिनट 20 सेकंड) नवीनः दूरदृश्य-सन्देशः प्रसारितः। पूर्वयोः द्वयोः दूरदृश्ययोः इव अस्य दूरदृश्यस्य प्रारम्भम् अपि प्रधानमन्त्रिणा मोदिना 'मित्राणि' (फ्रेंड्स) इति उक्त्वा कृतम्। प्रधानमन्त्री मोदी स्वकीये अस्मिन् दूरदृश्ये अकथयत्, "मित्राणि, छात्राणां भविष्यस्य कृते भारतसर्वकारः निरन्तरं बहूनि सोपनानि (पदानि) नयति। यैः जनाैः छात्राणां भविष्येण सह क्रीडितम्, ते कारागारेषु क्लिश्यन्ते (सीदन्ति)। वयम् आशु-न्यायालयान् (फास्ट ट्रैक कोर्ट) रचितवन्तः। वयम् श्वः संसदः अन्तः कठोर-विधानैः सह नवीन-नियमस्य (कानून) निर्माणस्य दिशि अपि अग्रे सरामः, किन्तु अस्माभिः भविष्यस्य कृते चिन्तनीयम्।"तेन उक्तम्, "अस्माकं परीक्षा-पद्धतिः विश्वस्ता भवेत्, अस्माकं परीक्षा-पद्धतिः पार दर्शिनी भवेत्, अस्माकं परीक्षा-पद्धत्याम् अत्यधिकं प्राविधिक्याः (टेक्नोलॉजी) उपयोगः भवेत्, एताः सर्वाः वाचः ध्याने स्थापयित्वा विश्वप्रसिद्ध-प्राविधिक-विशेषज्ञस्य नन्दन-निलेकणि-महोदयस्य नेतृत्वे उच्च-स्तरीय-कार्यदलस्य (हाई पावर्ड टास्क फोर्स) निर्माणस्य निर्णयः गृहीतः, यः परीक्षा-सुधारं प्रति ध्यानं केन्द्रीकरिष्यति तथा च शीघ्रातिशीघ्रम् आगामि-परीक्षाणां विश्वसनीयतां निश्चितां कर्तुं कार्यम् अस्य प्रतिवेदनस्य (रिपोर्ट) आधारेण करिष्यते।"

# राष्ट्रमण्डल-क्रीडासु मीराबाई-चानू-वर्गायाः स्वर्णिमं प्रदर्शनम्: भारतेन जितं प्रथमं स्वर्णपदकम्




भारतस्य तारा-भारोत्तोलिका (वेटलिफ्टर) मीराबाई चानू राष्ट्रमण्डल-क्रीडासु (राष्ट्रमंडल खेल 2026) इतिहासम् अरचयत् भारतस्य स्वर्णिम-अभियानस्य प्रारम्भम् अकरोत्। महिलानां ४८ किलोग्राम्-वर्गे मीराबाई उत्कृष्टं प्रदर्शनं कृत्वा स्वर्णपदकं स्वनाम्ना अकरोत्, एतत् राष्ट्रमण्डल-क्रीडासु भारतस्य प्रथमं स्वर्णपदकम् अस्ति। अनेन सह एव मीराबाई चानू राष्ट्रमण्डल-क्रीडासु स्वर्णपदकस्य स्वकीयां 'हैट्रिक'-श्रृङ्खलाम् अपूरयत्। अस्मात् पूर्वं सा २०१८ (गोल्ड कोस्ट) तथा २०२२ (बर्मिंघम) तमे वर्षे अपि भारताय स्वर्णपदकं प्रापयत्। मीराबाई चानू आहत्य १९० किलोग्राम्-भारम् उत्थाप्य स्पर्धायाम् एकपक्षीयं विजयं प्राप्नोत्। सा 'स्नैच'-चक्रे ८५ किलोग्राम्-भारम् उत्थाप्य नवीनं क्रीडा-कीर्तिमानं (गेम्स रिकॉर्ड) स्थापयित्वा स्वकीयां अग्रतां सुदृढाम अकरोत्। ततः 'क्लीन एंड जर्क'-चक्रे १०५ किलोग्राम्-भारम् उत्थाप्य इतिहासम् अरचयत्। २०१४ तमे वर्षे ग्लासगो-नगरे मीराबाई चानू स्वस्य प्रथमं राष्ट्रमण्डल-क्रीडा-पदकं जितवती आसीत्, यत् रजत-रूपेण आगच्छत्। अधुना निरन्तरं चतुर्थ-संस्करणे सा पदक-जयने सफलताम् अवाप्नोत्। गतेभ्यः त्रिभ्यः संस्करणेभ्यः सा स्वर्णपदकं जयति। मीराबाई चानू एतासु क्रीडासु स्वर्णस्य 'हैट्रिक'-श्रृङ्खलां स्थापयित्री प्रथमा भारतीया भारोत्तोलिका संजाता।

# 'विकसित-वाइब्रेंट-विलेज-कार्यक्रम-२०२६' इत्यस्य सहभागिभिः सह प्रधानमन्त्रिणः संवादः



प्रधानमन्त्री नरेन्द्रमोदी अकथयत् यत् सामूहिक-सहभागिता सर्वदा भारतस्य सांस्कृतिक-परम्परायाः शक्तिः आसीत्। सः अद्य दूरदृश्य-समीक्षा (वीडियो कॉन्फ्रेंस) माध्यमेन 'विकसित-वाइब्रेंट-विलेज-कार्यक्रम-२०२६' इत्यस्य सहभागिभिः सह सम्भाषणं कुर्वन् एताम् उक्तिं कृतवान्। अस्मिन् अन्तराले सर्वेभ्यः राज्येभ्यः केन्द्रशासित-प्रदेशेभ्यः च ४०० अधिकैः युवभिः स्वस्य अनुभवाः साजिताः।प्रधानमन्त्री अकथयत् यत् भारते जनाः सुदीर्घकालात् एकत्र मिलित्वा कार्यं कुर्वन्तः गीतानि गायन्ति स्म। अनेन परस्परम् एकता सुदृढा भवति तथा च सामूहिक-प्रयासाः अधिकाः आनन्ददायकाः तनावमुक्ताः च भवन्ति। सः अकथयत् यत् सर्वकारः तान् जनान् विकासस्य मुख्यधारायाः सह योजयितुं निरन्तरं प्रयासम् करोति, ये अद्यावधि इतः वञ्चिताः आसन्।प्रधानमन्त्री अकथयत् यत् अनेके युवानः अस्यां यात्रायाम् एकाकिनः निर्गताः आसन्, किन्तु 'माई भारत' (My Bharat) उपक्रमस्य माध्यमेन ते एकः परिवारः भूत्वा प्रतिनिवृत्ताः। सः एतां कार्यक्रमस्य महतीम् उपलब्धिं कथयन् अकथयत् यत् अनेन व्यक्तिगत-अनुभवाः राष्ट्रिय-एकतायाम् अपनत्वस्य भावनायां च परिवर्तिताः। स्वतन्त्र-रूपेण अस्यां यात्रायां सम्मीलितानां युवतीनाम् उल्लेखं कुर्वन् प्रधानमन्त्री अकथयत् यत् तासां सहभागिता भारतस्य पुत्रीणां आत्मविश्वासस्य साहसस्य च प्रतीकम् अस्ति। सः अकथयत् यत् सर्वकारः प्रत्येकं युवकं, विशेषतः देशस्य पुत्रीः आत्मविश्वासेन दृढ-सङ्कल्पेन च अग्रे नेतुं प्रतिबद्धः अस्ति।'विकसित-वाइब्रेंट-विलेज-कार्यक्रम' इत्यस्य अन्तर्गते सहभागिनः सीमावर्ती-क्षेत्राणां सामाजिक-आर्थिक-स्थितेः, सांस्कृतिक-परम्परायाः विकास-सम्भावनानां च समीपेन ज्ञानस्य अवसरम् प्राप्नुवन्ति। एषः कार्यक्रमः सामुदायिक-सहभागितायाः, राष्ट्रिय-एकतायाः सीमा-वर्ती-ग्रामैः सह सम्बद्धस्य कार्यनीतिक-महत्वस्य च प्रति जागरुकतायाः वर्धनस्य अपि प्रयासम् करोति

# पी-एम्-मोदी-महोदयस्य नेतृत्वे सर्वकारः नवपीढ्याः भविष्यस्य रक्षणाय निरन्तरं प्रयत्नशीलः: गृहमन्त्री अमितशाहः



गृहमन्त्री अमितशाहः उक्तवान् यत् प्रधानमन्त्रिणः नरेन्द्रमोदीमहोदयस्य नेतृत्वे सर्वकारः अस्माकं नवपीढ्याः भविष्यस्य रक्षणाय निरन्तरसुधारस्य सिद्धान्तस्य पालनं करोति। नन्दन-नीलेकेणि-महोदयस्य नेतृत्वे गठितस्य नवगठितस्य उच्चस्तरीय-कार्यबलस्य उपरि बलं ददत् श्रीशाहः अवदत् यत् एतत् कार्यबलं सुनिश्चितं करिष्यति यत् देशस्य परीक्षाप्रणाल्याः पवित्रतां कोऽपि कदापि भङ्गं कर्तुं न शक्नुयात्। सः उक्तवान् यत् सर्वकारः प्रश्नपत्र-प्रकटीकरणस्य (पेपर-लीक-इत्यस्य) दोषिजनेभ्यः कठोरं दण्डं दास्यति, तथा च एतत् सुनिश्चितं करिष्यति यत् कोऽपि भविष्ये ईदृशम् अपराधं कर्तुं न शक्नुयात्।

# शिक्षक-दिवसात् पूर्वं नूतन-परिसर-प्रणाल्याम् भविष्यति निर्णयः, मुख्यमंत्रिणः सुक्खोः बृहती घोषणा

**हिमसंस्कृतवार्ताः — शिमला।**

हिमाचलप्रदेशस्य मुख्यमन्त्रिणा ठाकुर-सुखविन्दरसिंहसुक्खू महोदयेन प्राथमिक-शिक्षकेभ्यः महतीं साहाय्यतां यच्छता प्रोक्तं यत् शिक्षक-दिवसात् (५ सितम्बर) पूर्वं नूतनायाः परिसर-प्रणाल्याः उपरि सर्वकारः अन्तिमं निर्णयं ग्रहीष्यति। तेन उक्तं यत् सर्वकारः अस्याः व्यवस्थायाः सहानुभूतिपूर्वकं समीक्षां करिष्यति आवश्यकतायां सत्यां च अस्यां परिष्कारं विधातुं निरसनं वा कर्तुं निर्णयं करिष्यति।

रविवासरे शिमलायाः चौड़ा-मैदान-स्थले आयोजितायां 'प्राथमिक-शिक्षक-सङ्घस्य' साधारणसभां सम्बोधयता मुख्यमन्त्रिणा कथितं यत् सर्वकारस्य शिक्षक-सङ्घस्य च मध्ये भवितव्ये आगामि-उपवेशने अस्मिन् विषये निष्पक्षः सकारात्मकश्च निर्णयः ग्रहीष्यते।

## निलम्बनं, विभागीया अन्वेषणानि, एफ.आई.आर. च निरंस्यन्ते

मुख्यमन्त्रिणा उद्घोषितं यत् प्राथमिक-शिक्षकाणां विरुद्धं कृताः निलम्बन-कार्याविधयः, विभागीयान्वेषणानि, पञ्जीकृताः एफ.आई.आर. (FIR) च प्रत्यावर्तिष्यन्ते। तेन एतदपि स्पष्टीकृतं यत् मुख्याध्यापकानां, केन्द्र-मुख्याध्यापकानां, खण्ड-प्रारम्भिक-शिक्षा-अधिकारिणां च अधिकारेषु कस्यापि प्रकारस्य न्यूनता न भविष्यति। अनेन सह एव प्राथमिक-विद्यालयेषु क्रीड़ा-गतिविधयः पुनः आरब्धुं घोषणा अपि कृता।

## जे.बी.टी.-शिक्षकेभ्यः लप्स्यते टी.जी.टी.-पदोन्नतिः

मुख्यमन्त्रिणा प्रोक्तं यत् राज्यसर्वकारः जे.बी.टी. (JBT) शिक्षकेभ्यः टी.जी.टी. (TGT) पदेषु पदोन्नतिं प्रदास्यति। तेन ज्ञापितं यत् शिक्षक-सङ्घस्य प्रतिनिधिभिः सह सचिवालये जाते उपवेशने विविधासु याचनासु विस्तारेण चर्चा कृता अस्ति। तेन शिक्षकेभ्यः विश्वासः प्रदत्तः यत् सर्वकारः तेषां हितानां पूर्णां सुरक्षां विधास्यति शिक्षाव्यवस्थां च सुदृढां कर्तुं तेषां सहयोगेन प्राथमिक-विद्यालयाः राज्यस्य श्रेष्ठतमाः विद्यालयाः विधास्यन्ते।



## आङ्ग्ल-माध्यम-सी.बी.एस.ई.-विद्यालयानाम् उपरि अपि अवदत्

मुख्यमन्त्रिणा कथितं यत् प्राथमिक-स्तरे आङ्ग्ल-माध्यमेन पठन-पाठनं पूर्वमेव आरब्धम् अस्ति। अस्मिन् दिशि शिक्षकाणां भूमिकायाः प्रशंसां कुर्वन् तेन उक्तं यत् सी.बी.एस.ई. (CBSE) विद्यालयेषु प्रधानाचार्याणां नियुक्तिः प्रायः पूर्णा संजाता तथा च शिक्षकाणां नियुक्ति-प्रक्रिया अपि निरन्तरा अस्ति।

### ओ.पी.एस.-पुनर्स्थापनस्य अपि कृतः उल्लेखः

मुख्यमन्त्रिणा प्रोक्तं यत् सर्वकारेण प्रथमे मन्त्रिमण्डल-उपवेशने १.३६ लक्ष-कर्मचारिणां कृते पुरातन-वृत्ति-योजना (OPS) पुनर्स्थापिता आसीत्। तेन कथितं यत् एषः निर्णयः कर्मचारिणां सम्मानं सम्प्रतीतिं (आर्थिक-सुरक्षां) च ध्यात्वा गृहीतः। तेन उक्तं यत् नूतन-वृत्ति-योजनायाः अन्तर्गतं बहुभ्यः कर्मचारिभ्यः अतीव न्यूना वृत्तिः प्राप्यते स्म, यदा च ओ.पी.एस. प्रवर्तिता तदा अनेकेभ्यः सेवानिवृत्त-कर्मचारिभ्यः श्रेष्ठतरायाः वृत्तिलाभः प्राप्यते।

## भाजपा-दलं प्रति व्यङ्ग्यपातं कृतम्

मुख्यमन्त्रिणा कथितं यत् राज्यसर्वकारः हिमाचलस्य अधिकाराणां संसाधनानां च रक्षणाय निरन्तरं सङ्घर्षं करोति। तेन भाजपा-दलं प्रति व्यङ्ग्यपातं कुर्वता आरोपः कृतः यत् पूर्वतनः सर्वकारः प्रदेशस्य उपरि महान्तम् आर्थिकभारं त्यक्त्वा गतः। तेन प्रोक्तं यत् सर्वैः हिमाचलस्य हितानां रक्षणाय एकीभूय कार्यं करणीयं भविष्यति।




## MONSOON UPDATE - हिमाचले २८ तः ३१ जुलाई यावत् अति-अतिवृष्टेः सतर्कता, 'जलोप्लवस्य' भूस्खलनस्य च सचेतना

हिमसंस्कृतवार्ताः — शिमला।

हिमाचलप्रदेशे मानसून-ऋतुः पुनः एकवारं सक्रियः भवितुं गच्छति, येन प्रदेशस्य अधिकांशेषु भागेषु आगामि-कतिपय-दिनेषु लघ्वी मध्यम-वृष्टिः वा भवितुं सम्भावना अस्ति। भारत-्ःतु-विज्ञान-केन्द्र-शिमलायाः (IMD) पक्षतः प्रसारितेन नूतनेन प्रसारणेन २७ जुलाई तः १ अगस्त दिनाङ्कं यावत् प्रदेशे वर्षा निरन्तरं स्थास्यति। यद्यपि २८ तः ३१ जुलाई-मध्ये बहुषु स्थानेषु अतिवृष्टेः अति-अतिवृष्टेः वा आशङ्का प्रकटीकृता। ऋतुविज्ञानविभागेन नागरिकेभ्यः भूस्खलन-अकस्मात्-आप्लवन (फ्लैश फ्लड) जलपूरण-सदृशीभ्यः सम्भाव्याभ्यः घटनाभ्यः प्रति सतर्कता ग्रहीतुं परामर्शः दत्तः।

### रविवासरस्य वर्षा महत्त्वपूर्णानि विवरणानि च

रविवासरे अपि प्रदेशस्य बहुषु भागेषु लघ्वी मध्यम-वर्षा वा अभिलिखिता, यदा च केषुचित् स्थानेषु अतिवृष्टिः अभवत्। सुन्दरनगर-क्षेत्रे सर्वाधिक-७० मिलीमीटरमिता वर्षा अभिलिखिता। एतदतिरिच्य, मालरांव-होमो-कसोल-क्षेत्रयोः ५०-५० मिलीमीटर तथा च शिमला-एयरपोर्ट-स्थाने अपि ५० मिलीमीटर वर्षा अभिलिखिता।

### केषु मण्डलेषु वर्धिष्यते वर्षायाः सङ्कटः?

ऋतुविज्ञानविभागस्य भविष्यवाणी-अनुसारं २८ तः ३१ जुलाई-मध्ये शिमला, मण्डी, काङ्गड़ा, सिरमौरः, सोलनम्, ऊना, बिलासपुरम्, हमीरपुरम्, चम्बा मण्डलानां बहुषु क्षेत्रेषु अतिवृष्टेः अति-अतिवृष्टेः वा प्रबला सम्भावना अस्ति। कुल्लू-मण्डी मण्डलयोः अपि पृथक्-पृथक् स्थानेषु अतिवृष्टेः पूर्वानुमानम् अस्ति।

## जलोप्लवस्य भूस्खलनस्य च चिन्ता

ऋतुविज्ञानविभागेन विशेष रूपेण सचेतना प्रसारिता यत् अतिवृष्टेः कारणेन प्रदेशस्य संवेदनशील-क्षेत्रेषु भूस्खलनस्य, पङ्क-स्खलनस्य (कीचड़ खिसकने), अकस्मात् आप्लवनस्य, नदी-उपनदीनां जलस्तरे वृद्धेः तथा च निम्न-क्षेत्रेषु जलपूरण-सदृशीनां गम्भीराणां स्थितिनाम् उत्पत्तिः भवितुं शक्नोति। एतदतिरिच्य, स्खलनयुक्त-मार्गेभ्यः न्यून-दृश्यतायाश्च (Visibility) कारणेन यातायात-व्यवस्था अपि प्रभाविता भवितुं शक्नोति।

## सर्वसाधारणाय महत्त्वपूर्णा निर्देशाः

ऋतुविज्ञानविभागेन प्रदेशवासिभ्यः प्रार्थना कृता यत् ते वर्षाकाले नदी-उपनदीनां तटेभ्यः भूस्खलन-सम्भाव्य-क्षेत्रेभ्यश्च दूरीं रचयन्तु। निष्प्रयोजन-यात्राभ्यः रक्षितुं ऋतुविज्ञाशविभागेन प्रसार्यमाणानां नूतन-सूचनानां उपरि निरन्तरं दृष्टिं रचयितुं परामर्शः दत्तः। साकमेव प्रशासनेन प्रसारितानां दिशानिर्देशानां कठोरतया पालनं कर्तुम् आग्रहः कृतः। भारत-ऋतु-विज्ञान-केन्द्रस्य (IMD) १ जून तः २६ जुलाई २०२६ दिनाङ्कं यावत् वर्षायाः विवरणानुसारं प्रदेशे प्रायः ७ प्रतिशतं न्यूना वर्षा अभिलिखिता। यद्यपि केषुचित् मण्डलेषु सामान्यात् अधिका वर्षा अभवत्, यदा च बहुषु मण्डलेषु वर्षायाः महती न्यूनता अस्ति।

## अधुना आर्द्रकम् कोऽपि रोगः नाशयितुं न शक्नोति, नौणी-विश्वविद्यालयः रोग-सहनशीलाम् आर्द्रकप्रजातिं विकसितवान्



डॉ. यशवन्त-सिंह-परमार-औद्यानिकी-एवं-वानिकी-विश्वविद्यालयस्य (नौणी) वैज्ञानिकाः आर्द्रक-कृष्या सम्बद्धानां कृषकाणां कृते महतसौख्य-प्रदात्रीं सिद्धिं प्राप्तवन्तः। विश्वविद्यालयस्य जैवप्रद्योगिकी-विभागः 'फ्यूजैरियम'-संक्रमणं प्रति सहनशीलाः आर्द्रकस्य नवीनाः रेखाः (लाइन्स) विकसितवान्। एषा सफलता प्रदेशस्य तेषां कृषकाणां कृते अतीव महत्त्वपूर्णा मन्यते, ये वर्षेभ्यः 'सॉफ्ट रॉट' तथा 'येलोज़' इति रोगाभ्यां महतीं हानिं सहन्ते स्म। सूच्यते यत् आर्द्राकः प्रदेशस्य प्रमुखासु धनदायिनी-सस्येषु (नकदी-फसलेषु) शामिलः अस्ति। प्रदेशे आर्द्राकस्य कृषिः मुख्यरूपेण सोलन-सिरमौर-मण्डलस्य बृहत्-पैमाने क्रियते, यत्र एषा कृषकाणां प्रमुखा धनदायिनी-सस्या अस्ति। एतदतिरिच्य मण्डी, काङ्गड़ा, बिलासपुर, हमीरपुर, ऊना च इत्यादीनां बहुषु क्षेत्रेषु अपि आर्द्राकस्य उत्पादनं भवति। प्रदेशस्य अनुकूला जलवायुः उपजाऊ मृत्तिका च आर्द्राकस्य कृषये उपयुक्ता मन्यते। सोलन-सिरमौर-मण्डले प्रदेशस्य बृहत्तमे आर्द्राक-उत्पादक-मण्डले स्तः, यत्र सहस्रशः कृषकाः अस्याः सस्यायाः स्वजीविकां चालयन्ति, परन्तु रोगमुक्त-रोपण-सामग्र्याः अभावः तथा 'फ्यूजैरियम'-जनिताः रोगाः अस्याः कृषिं निरन्तरम् प्रभावितवन्तः।

एषः रोगः क्षेत्रेषु सस्यायाः उत्पादनं न्यूनीकर्तुं सह-सह भण्डारण-काले अपि प्रकन्दान् (राइजोम) क्षतिं प्रापयति। बहुषु क्षेत्रेषु अनेन रोगेण ५० प्रतिशत-पर्यन्तं सस्या प्रभाविता भवतीति प्रकरणाानि सम्मुखम् आगतानि, येन कृषकाणां प्रतिवर्षं लक्षशः रूप्यकाणां हानिः भवति। नौणी-वैज्ञानिकानाम् अनुसारम् आर्द्रकस्य उत्पादनं बीजेभ्यः न, अपि तु प्रकन्दानां माध्यमेन भवति।

अनुसन्धान-निदेशकः डॉ. देविना वैद्यः उक्तवान् यत् एषा उपलब्धिः सस्य-सुधार-अनुसन्धाने एकः महत्त्वपूर्णः मीलस्य प्रस्तरः (मील का पत्थर) सिद्धः भविष्यति। स्वास्थ्या रोग-सहनशीला च रोपण-सामग्री उपलब्धा सती सस्य-हानिः न्यूना भविष्यति, उत्पादनं वर्धिष्यते, कृषकाणाम् आय-वर्धने च उल्लेखनीयः विकासः भविष्यति। विश्वविद्यालयस्य कुलपतिः प्रो. एच्. एस्. बवेजा उक्तवान् यत् एषा सफलता कृषकाणां वास्तविकीनां समस्यानां समाधानाय विश्वविद्यालयस्य वैज्ञानिकायाः प्रतिबद्धतायाः प्रमाणम् अस्ति।

# एच.आर.टी.सी.मध्ये शीघ्रमेव आरप्स्यते 'हिम-बस-प्लस्-कार्ड', इति अधुना यावत् निर्मिताणि सर्वाणि अपकर्षपत्राणि अस्मिन् भविष्यन्ति विलीनानि




**हिमसंस्कृतवार्ताः — शिमला।**
हिमाचलप्रदेशे 'हिम-बस-कार्ड' इत्यस्य सफलतायाः परं अधुना सर्वेभ्यः यात्रिभ्यः एकः समानः सामान्यपरिपत्रं' (Common Card) निर्मास्यते। एतं 'परिपत्रम्' आनेतुं सज्जीकरणानि अन्तिम-चरणे सन्ति। यात्रिणां सौविध्याय अङ्कीय-व्यवस्थां (Digital System) इतोऽपि सुदृढां विधातुं परिवहन-निगमः 'हिम-बस-प्लस्-कार्ड' (Him Bus Plus Card) इति प्रसारयितुं गच्छति। एषः नूतनः 'उन्नतं पत्रं' भविष्यति यस्मिन् अधुना यावत् निर्मिताणि सर्वाणि अपकर्षपत्राणि विलीनानि (Merge) करिष्यन्ते एतद् 'परिपत्रं' पूर्णतया अङ्कीयः (Digital) भविष्यति यस्मात् सुदीर्घ-दूरतायाः यात्रां कुर्वन्तः यात्रिणः अपि लाभान्विताः भविष्यन्ति। तत्रैव अनेन 'कार्ड' इति माध्यमेन यात्रिणः पृथक्-पृथक् 'कार्ड' स्थापनस्य समस्यातः पूर्णतया मुक्तिं प्राप्स्यन्ति। अस्य नूतनस्य प्रयासस्य न केवलं 'यात्रापत्रं'-प्रणाली सरला भविष्यति, अपितु यात्रिभ्यः सुलभा, तीव्रा, पारदर्शिका च यात्रा-सुविधा अपि लप्स्यते। नूतनस्य 'हिम-बस-प्लस्-कार्ड' इत्यस्य सर्वाधिका विशिष्टता एषा अस्ति यत् अस्य मूल्यं (शुल्कम्) केवलम् १ रूप्यकं प्रति-दिनं निर्धारितम् अस्ति। अर्थात् अतीव न्यून-व्यये यात्रिणः अस्य 'स्मार्ट-कार्ड' इत्यस्य सर्वासां सुविधानां लाभं ग्रहीतुं शक्ष्यन्ति। 'कार्ड'-मध्ये सर्वासां श्रेणीनां यात्रिभ्यः ५ प्रतिशतं यावत् प्रत्यक्षापकर्षः (Discount) लप्स्यते, यदा च वरिष्ठ-नागरिकेभ्यः (Senior Citizens) अस्मिन् १५ प्रतिशतं यावत् विशेषापकर्षः दीयते। एषः निर्णयः विशेषरूपेण नियत-यात्रिभ्यः, कर्मचारिभ्यः, छात्रेभ्यः, वृद्धेभ्यश्च महतीं साहाय्यतां (राहत) आनेष्यति। एच.आर.टी.सी. इत्यस्य एतद् नूतनं 'परिपत्रं' पूर्णतया अङ्कीय-स्मार्ट-प्रविधौ आधारितः भविष्यति। अस्मिन् 'कार्ड'-धारकस्य सम्पूर्णं प्रलेखं (Data) अन्तर्निहितं स्थास्यति, येन परिचयः, 'टिकट'-आरक्षणं, यात्रा-विवरणं, भुक्ति-सम्बद्धाः च सर्वाः सूचनाः सुरक्षिताः व्यवस्थिताश्च अङ्किताः भविष्यन्ति। अनेन 'टिकट'-परीक्षण-काले पारदर्शिता वर्धिष्यते छद्मव्यवहारस्य सम्भावनाः च प्रायः समाप्ताः भविष्यन्ति। नूतन-व्यवस्थायाः प्रवर्तनेन 'परिचालक'-कर्मचारिणां कार्येषु अपि सुगमता आगमिष्यति। अङ्कीय-यन्त्रस्य (Digital Machine) माध्यमेन 'टिकट' कर्तिष्यते, येन समयस्य रक्षणं भविष्यति यात्रिणः च दीर्घाभ्यः पङ्क्तिभ्यः मुक्तिं प्राप्स्यन्ति। साकमेव निगमस्य राजस्व-वर्धने हान्याः न्यूनीकरणे च साहाय्यं लप्स्यते। एच.आर.टी.सी. अधिकारिणाम् अनुसारं 'हिम-बस-प्लस्-कार्ड' शीघ्रमेव सम्पूर्णे प्रदेशे चरणबद्ध-रूपेण प्रवर्तिष्यते। अस्य कृते तान्त्रिक-सज्जीकरणानि अन्तिम-चरणे सन्ति शीघ्रमेव अस्य 'पायलट-प्रोजेक्ट' आरब्धुं शक्यते। 'हिम-बस-प्लस्-कार्ड' हिमाचले सार्वजनिक-परिवहन-व्यवस्थां आधुनिकीं, सुलभां, यात्र्यनुकूलां च विधातुं दिशि एकं क्रान्तिकारि-पदं सिद्धं भविष्यति। अनेन यत्र यात्रिभ्यः श्रेष्ठतराः सुविधाः प्रत्यक्षं रक्षणं (सञ्चयः) च लप्स्यते, तत्रैव एच.आर.टी.सी. संस्थायै अपि अङ्कीय-युगस्य अनुरूपं नूतनं परिचयं प्राप्स्यति।

## यावती यात्रा, तावती रक्षिष्यते राशिः

'हिम-बस-प्लस्-कार्ड' इत्यस्य एका परा मुख्या विशिष्टता एषा अस्ति यत् अस्मिन् यात्रिणः यात्रा-अनुसारं 'अपकर्षः' (छूटः) निर्धारितः भविष्यति। अर्थात् यावती अधिका यात्रा, तावती अधिका राशिः रक्षिष्यते। नियमित-रूपेण बस-यानेषु यात्रां कुर्वद्भ्यः अस्य प्रत्यक्षः लाभः लप्स्यते तेभ्यश्च समयेन सह अधिकापकर्षः प्राप्स्यते। अनेन जनाः निजी-वाहनानां (Private Vehicles) स्थाने सार्वजनिक-परिवहनं प्राथमिकतां प्रदास्यन्ति, येन पर्यावरण-संरक्षणं 'ट्रैफिक'-नियन्त्रणं च अपि प्रोत्साहनं लप्स्यते।

### एकेनैव 'कार्ड'-माध्यमेन लप्स्यन्ते यात्रा-सुविधाः

एच.आर.टी.सी. पक्षतः पूर्वं प्रसारिताणि विविधानि 'यात्रापत्राणि', 'पास' तथा च अपकर्ष-पत्राणि अधुना अस्मिन् एकेनैव 'कार्ड'-मध्ये समाविष्टानि करिष्यन्ते। अनेन यात्रिभ्यः पृथक्-पृथक् 'कार्ड' निर्माणस्य संरक्षणस्य च आवश्यकता न भविष्यति। एकेनैव 'कार्ड'-माध्यमेन सामान्या यात्रा, मासिक-पास, छात्र-पास, कर्मचारी-पास अन्याः च सर्वाः सुविधाः प्राप्तुं शक्ष्यन्ते

# सुखविन्दरसिंहसुक्खुना रविवासरे काङ्गड़ा-जनपदस्य शाहपुर-क्षेत्रस्य बोह-क्षेत्रे मेघस्फोटस्य घटनया प्रभावितानां क्षेत्राणां प्रवासं कृत्वा आश्रय-पुनर्वास-कार्याणां निरीक्षणं कृतम्







# काङ्गड़ा-जनपदस्य बोह-उपत्यकायां प्रभावितेभ्यः २५ परिवारेभ्यः गृह-निर्माणाय लप्स्यन्ते सार्ध-अष्ट-लक्ष-रूप्यकाणि

### परिवारेभ्यः गृह-निर्माणाय सर्वकारीय-भूमिः उपलब्धा कारयिष्यते: - मुख्यमंत्री सुक्खुः

हिमसंस्कृतवार्ताः — काङ्गड़ा। हिमाचलप्रदेश-सर्वकारस्य मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना रविवासरे काङ्गड़ा-जनपदस्य शाहपुर-क्षेत्रस्य बोह-क्षेत्रे मेघस्फोटस्य (बादल फटने) घटनया प्रभावितानां क्षेत्राणां प्रवासं कृत्वा आश्रय-पुनर्वास-कार्याणां निरीक्षणं कृतम्। अस्मिन् अवसरे तेन राजकीय-वरिष्ठ-माध्यमिक-विद्यालये, बोह-स्थाने स्थापिते आश्रय-शिविरे निरीक्षणं कृतं तत्र च स्थापितेभ्यः प्रभावितेभ्यः परिवारेभ्यः मेलनं कृत्वा तेषां कुशलक्षेमं ज्ञातम्। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू महोदयेन प्रोक्तं यत् येषां २५ परिवाराणां गृहाणि अस्यां आपदि पूर्णतया विनष्टानि संजातानि, तेभ्यः गृह-निर्माणाय ७.५० लक्ष-रूप्यकाणाम् आर्थिक-साहाय्यं प्रदास्यते। एतदतिरिच्य, वस्त्राणां, पात्राणां (बर्तन) अन्येषाम आवश्यकानां गृह-वस्तूनां क्रयणाय एकलक्ष-रूप्यकाणां साहाय्यं अपि प्रदास्यते। तेन कथितं यत् येषां प्रभावितानां परिवाराणां पार्श्वे वासाय भूमिः उपलब्धा नास्ति, तेभ्यः सर्वकारः आवश्यकतानुसारं सर्वकारीयां भूमिम् अपि उपलब्धं कारयिष्यति।
स्मर्तव्यम् अस्ति यत् शाहपुरस्य बोह-घाट्याम् मेघस्फोटनेन घुड़घुं, भङ्गार, सपेड़ा इति ग्रामाणाम् आहत्य २५ परिवाराः अस्याः आपदः पूर्णतया प्रभाविताः अभवन्। सुरक्षां सर्वोच्च-प्राथमिकतां दत्त्वा सपेड़ा-ग्रामस्य १३ गृहाणि 'सङ्कट-क्षेत्रम्' (Danger Zone) इति घोषितानि। मुख्यमन्त्रिणा प्रोक्तं यत् येषां परिवाराणां धेनुः महिषी वा आपदि मृता, तेभ्यः ५५ सहस्र-रूप्यकाणि प्रति-पशु तथा च येषां अजाः मृताः, तेभ्यः १५ सहस्र-रूप्यकाणि प्रति-अजा साहाय्य-राशिः दीयते। येषु गृहेषु आप्लवनस्य आपदो वा जलस्य प्रवेशेन हानिः संजाता, तेभ्यः एकलक्ष-रूप्यकाणां साहाय्यं प्रदास्यते। एतेनैव प्रकारेण, क्षतिग्रस्ताभ्यः विपणिभ्यः हान्याः आधारे ५० सहस्रतः एकलक्ष-रूप्यकाणि यावत् साहाय्यं दीयते। तेन कथितं यत् येषां कृषकाणां सस्यानां (फसलों की) हानिः संजाता, तेभ्यः ५ सहस्र-रूप्यकाणि प्रति-कनाल-आधारेण क्षतिपूर्तिः दीयते। येभ्यः परिवारेभ्यः अस्थायी-रूपेण भाटके गृहेषु स्थातव्यं भविष्यति, तेभ्यः ५ सहस्र-रूप्यकाणि प्रतिमासं भाटक-साहाय्यं प्रदास्यते। एतदतिरिच्य, प्रभावितेभ्यः परिवारेभ्यः षण्मासानां धान्यं (राशन) अपि निःशुल्कम् उपलब्धं कारयिष्यते। मुख्यमन्त्रिणा ज्ञापितं यत् प्रभावितेभ्यः परिवारेभ्यः सद्यः साहाय्यं यच्छता २५ परिवारेभ्यः २५-२५ सहस्र-रूप्यकाणि तथा च १६ अन्येभ्यः परिवारेभ्यः १०-१० सहस्र-रूप्यकाणि यावत् मध्यवर्ति-साहाय्य-राशिः प्रसारिता अस्ति। पुनर्वास-कार्येषु अपि प्रशासनं वेगेन संलग्नं वर्तते।
अस्मिन् अवसरे मुख्यमन्त्रिणा रिडकमार-प्राथमिक-स्वास्थ्य-केन्द्रस्य (PHC) सामुदायिक-स्वास्थ्य-केन्द्ररूपेण (CHC) पदोन्नतेः घोषणा अपि कृता। येन क्षेत्रे स्वास्थ्य-सेवानां इतोऽपि सुदृढीकरणं विधातुं शक्ष्यते। अस्मिन् अवसरे शाहपुरस्य विधायकः उप-मुख्य-सचेतकः च केवलसिंहपठानिया, हिमाचलप्रदेश-राज्य-आपदा-प्रबन्धन-प्राधिकरणस्य उपाध्यक्षः दीपकराठौरः, ऊर्ण-सङ्घस्य (Wool Federation) अध्यक्षः मनोजकुमारः, स्थानीय-पञ्चायत-प्रधाना नीलमकुमारी, उपायुक्तः काङ्गड़ा हेमराजबैरवा, आरक्षणाधीक्षकः कुलभूषणवर्मा विविधानां विभागानां च अधिकारिणः उपस्थिताः आसन्।




केन्द्रीयशिक्षामन्त्रिणः धर्मेन्द्रप्रधानस्य त्यागपत्रस्य सन्दर्भे केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः स्वीये विश्लेषणात्मके वक्तव्ये अकथयत् यत्- अहं वैयक्तिकरूपेण तस्याः दुर्भाग्यपूर्णायाः घटनायाः कारणात् अत्यन्तं दुःखितः अस्मि, यस्याः परिणामस्वरूपेण एकः निष्ठावान् समर्पितश्च नेता श्रीधर्मेन्द्रप्रधानवर्यः त्यागपत्रं दत्तवान्। मम विश्वासः अस्ति यत् शिक्षाक्षेत्रे तस्य योगदानं इतिहासः सदैव स्मरिष्यति। एतत् अतीव दुर्भाग्यपूर्णम् अस्ति यत् अस्याः खेदजनकघटनायाः कारणेन शिक्षाजगत् तादृशं नेतारं त्यक्तवत्, येन गतेषु चतुर्षु वर्षेषु राष्ट्रिय- शिक्षा-नीतेः (एन.ई.पी.) प्रभाविनः त्वरितस्य च कार्यान्वयनस्य कृते असाधारण-प्रतिबद्धतया सह कार्यं कृतम्। तेन केवलं नीतिः न निर्मिता, अपि तु तां धरातले अवतारयितुं कार्यम् अपि विहितम्। तेन स्वकीयः निर्णयः गृहीतः; इतिहासः स्वयं निश्लेष्यति यत् कः सम्यक् आसीत् कश्च असम्यक्। परन्तु केवलम् एकस्य मन्त्रिणः त्यागपत्रेण शिक्षाव्यवस्थायाम् आमूलचूलं परिवर्तनं न आगमिष्यति, न च तस्याः संरचनात्मकानि आह्वानानि समाप्तानि भविष्यन्ति। सर्वे वयं ये शिक्षाव्यवस्थायाः अङ्गीभूताः स्मः- शिक्षकाः, विश्वविद्यालयप्रशासकाः, नीतिनिर्मातारः, शोधकर्तारः, छात्राः, अभिभावकाश्च- अस्माभिः शिक्षायां सार्थकमहापरिवर्तनस्य आनयनाय सामूहिकम् उत्तरदायित्वं स्वीकारणीयं भविष्यति। परिष्कारः केवलं सर्वकारस्य स्कन्धयोः न त्यक्तुं शक्यते।

## शिक्षाप्रणाल्याः गभीर-आत्ममन्थनम्-

परीक्षा-प्रश्नपत्र-प्रकटनस्य (लीक) घटनाः अपि गभीर-आत्ममन्थनस्य याचनां कुर्वन्ति। निःसंशयम्, 'राष्ट्रीय परीक्षा एजेंसी' (एन.टी.ए.) सदृशीनां संस्थानां कार्यप्रणाल्याः, संरचनायाः, उत्तरदायित्वस्य, मानक-सञ्चालन-प्रक्रियाणां (एस.ओ.पी.) च व्यापिका समीक्षा आवश्यकी अस्ति। किन्तु अस्माभिः एकस्य अप्रिय-सत्यस्य अपि सम्मुखीकरणं करणीयम् यत् एतादृशेषु अनेकेषु अपराधेषु स्वयं शिक्षणसमुदायस्य केचन सदस्याः अपि संलिप्ताः प्राप्ताः सन्ति। यदा शिक्षकाः एव स्वकीय-नैतिक-दायित्वात् सन्धिं कुर्वन्ति, तदा तस्य दुष्परिणामः केवलम् एकां परीक्षां यावत् सीमितः न तिष्ठति, अपि तु सम्पूर्णराष्ट्रस्य शिक्षाव्यवस्थायाः विश्वसनीयतायां प्रश्नचिह्नम् उत्थाप्यते। सर्वकारेण तत्कालं राजनैतिकं मूल्यम् अवश्यं दातव्यं स्यात्, परन्तु वास्तविकी क्षतिः राष्ट्रस्य तस्य शिक्षाप्रणाल्याः विश्वसनीयतायाः च संजाता अस्ति। अधुना अस्माभिः एतत् विचारणीयं भविष्यति यत् अस्य वास्तविकं मूल्यं केन प्रत्यर्पितम्। अनेन सह एव अस्माभिः अस्य सङ्कटस्य एकस्मिन् अन्यस्मिन् अतीव चिन्ताजनके पक्षे अपि विचारः करणीयः। परीक्षायाः अत्यधिक-मानसिक- प्रभावस्य कारणेन अनेके छात्राः स्वप्राणान् अपि अत्यजन्। एतत् अस्माकं सम्मुखे मूलभूतान् प्रश्नान् उत्थापयति। अस्माकं शिक्षाव्यवस्था छात्रेभ्यः कान् मूल्यान् यच्छन्ती अस्ति? वयं कीदृशानां युवामनसां निर्माणं कुर्वन्तः स्मः? किं वयं तेभ्यः मानसिकदृढतां, भावनात्मकसन्तुलनम्, असफलतानां सम्मुखीकरणं कर्तुं क्षमतां च प्रयच्छन्तः स्मः, उत तादृशीं सन्ततिं सज्जीकुर्वन्तः स्मः या परीक्षायाः परिणामान् एव स्वजीवनस्य मूल्यं मन्यते? अस्य मानसिक-अवसादस्य कृते अभिभावकानाम् अपि समाना उत्तरदायिता अस्ति।

## परीक्षाप्रणाल्यां पुनर्विचारस्य आवश्यकता-

अस्माकं परीक्षाप्रणाल्याम् अपि गभीरपुनर्विचारस्य आवश्यकता अस्ति। एकत्र वयं अस्वस्थप्रतिस्पर्धां न्यूनीकर्तुं समग्र-शिक्षायाः च वार्तां कुर्मः, अपरत्र अस्माकं सम्पूर्णा व्यवस्था अत्यधिक- प्रतिस्पर्धात्मकासु उच्च-पक्ष-युक्तासु प्रवेशपरीक्षासु एव आधारिता अस्ति। एषः विरोधाभासः अस्माकं शिक्षाप्रणालीं तस्याः एव संरचनायां संयोजितवान् अस्ति। अधुना केवलं वारं वारम् उत्पद्यमानानां समस्यानां समाधानं पर्याप्तं न भविष्यति; अस्माभिः सम्पूर्णायाः व्यवस्थायाः संरचनायां पुनर्विचारं कृत्वा तस्याः पुनर्निर्माणं करणीयं भविष्यति।

भारतस्य शिक्षाव्यवस्था विश्वस्य विशालतमासु व्यवस्थासु एका अस्ति। एषा एकेन विशाल-पोतेन समाना अस्ति। कश्चिद् अपि पोतनायकः, कामं सः कियान् अपि सक्षमः न भवेत्, एकाकी-रात्रौ तस्य दिशाम् परिवर्तयितुं न शक्नोति। अनेकेषु क्रमेषु पोतनायकस्य श्रेष्ठतमप्रयासानां सत्यपि पोतः शिलाभिः सह ताडितः भवितुं शक्नोति। दिशापरिवर्तनं भवेत् वा तस्मिन्नेव मार्गे अग्रे सरणं भवेत्- द्वयोः अपि स्थित्योः कठोराः निर्णयाः संकटाश्च अपरिहार्याः सन्ति। स्थायि-परिष्काराय धैर्यं, निरन्तरता, संस्थागत-सहयोगः, जनविश्वासश्च आवश्यकः भवति।

अद्यतनः युवावर्गः, यं वयं 'जेन झी' (Gen Z) इति वदामः, सोशलमीडिया, राजनैतिकविमर्शैः, सहचराणां प्रभावैः, भावनात्मक-उत्तेजनाभिः च सह अनेकाभिः शक्तिभिः प्रभावितः भवति। तेषां भावनात्मकप्रतिक्रियाः स्वाभाविकाः सन्ति। किन्तु अस्माभिः, अभिभावकैः, शिक्षकैः, शिक्षाजगतः नेतृत्वकर्तृभिश्च, स्वस्मात् एकः कठिनः प्रश्नः प्रष्टव्यः- यदि वयं स्वगृहेषु एव स्वबालकेभ्यः सम्यक् दिशानयने बहुवारं सङ्घर्षं कुर्मः, तर्हि केवलं सर्वकारेभ्यः एषा अपेक्षा कथं कर्तुं शक्यते यत् ते रथ्यासु समागच्छतां भावनात्मकानाम् आन्दोलनानाम् एकाकिनः प्रभावी-रूपेण सञ्चालनं कुर्युः?

## एकः अनुत्तरितः प्रश्नः-

प्रधानमन्त्रिणा शिक्षामन्त्रिणा च जनतायाः चिन्तानां प्रति संवेदनशीलता प्रदर्शिता तथा च यूनाम् ध्वनिः श्रुता। तथापि एकः महत्त्वपूर्णः प्रश्नः अद्य अपि अनुत्तरितः अस्ति- अन्ते अस्य आन्दोलनस्य नेतृत्वं केन कृतम्? वास्तवतः छात्राणां प्रतिनिधित्वं केन कृतम्? सार्वजनिकविमर्शः शीघ्रमेव एकस्यामेव याचनायां सीमितः अभवत्- शिक्षामन्त्रिणः त्यागपत्रम्। परन्तु तस्मात् परं किम् अभवत्? शिक्षापरिष्कारस्य विस्तृतं नियोजनं कुत्र आसीत्? परीक्षाप्रणालीं सुदृढां विधातुं, प्रशासनिक- व्यवस्थायां परिष्कारम् आनेतुम्, वैश्विक- श्रेष्ठतम- अभ्यासान् अङ्गीकर्तुं, जनतायाः विश्वासं च पुनर्स्थापयितुं गभीरा चर्चा कुत्र अभवत्? तेषु निर्णायकेषु दिनेषु प्रदर्शनानि, घोषाः, विरोधाश्च व्यापकं प्रचारं प्राप्नुवन्। किन्तु एषः प्रश्नः उत्तिष्ठति यत् किं तावती एव ऊर्जा शिक्षाविशेषज्ञैः, मनोवैज्ञानिकैः, परीक्षाविशेषज्ञैः, प्रविधि-विशेषज्ञैः, नीति-निर्मातृभिश्च सह व्यावहारिक-समाधानस्य अन्वेषणाय गभीर-सार्वजनिक-संवादस्य आयोजने नियोजिता? किं वयम् सामूहिकरूपेण एतत् ज्ञातुं प्रयासम् अकुर्म यत् विश्वस्य श्रेष्ठतमाभ्यः परीक्षाप्रणालीभ्यः भारतं किं शिक्षितुं शक्नोति? किं वयम् अस्मिन् विचारविमर्शम् अकुर्म यत् भारतं कथम् अधिक-विश्वसनीयं, मानवीयं, भविष्यस्य आवश्यकतानाम् अनुरूपं च मूल्याङ्कनप्रणालीं विकसितं कर्तुं शक्नोति? केनापि टी.वी. प्रसारणेन अस्य दायित्वस्य निर्वहणम् न कृतम्। स्वयम् बृहत्-परिष्कारकान् दर्शयद्भिः प्रदर्शनकर्तृभिः केनापि अस्मिन् विषये एकघण्टायाः गभीरचर्चायाः प्रयासः न कृतः। अधिकांशः जनाः विपक्षी- राजनैतिक-दलानां समर्थनसङ्ग्रहणे सफलीभावस्य श्रेयग्रहणे च अधिकाः व्यग्राः अदृश्यन्त।

विश्वविद्यालयैः अपि आत्ममन्थनं करणीयम्। किं ते केवलं तादृशाः मञ्चाः भवन्तः सन्ति यत्र राजनैतिक-विचाराणां पुनरावृत्तिः प्रचारश्च क्रियते? उत ते शिक्षापरिष्कारेषु तथ्याधारितम्, अनुसन्धानपरकं, सार्थकं च विमर्शम् आरभ्य स्वकीयस्य वास्तविक-शैक्षणिक-दायित्वस्य निर्वहणं कुर्वन्तः सन्ति? उच्चशिक्षा-संस्थाभिः केवलं राजनैतिक-घटनासु प्रतिक्रियाप्रदानात् ऋते राष्ट्रिय-शिक्षा-नीतौ परिष्कारेषु च नेतृत्वकारी भूमिका निर्वोढव्या।

अद्य प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः नेतृत्वयुक्तात् सर्वकारात् देशस्य आशा अस्ति। "मोदी अस्ति तर्हि सम्भवम् अस्ति" केवलम् एकः घोषः न, अपि तु एषः विश्वासः यत् एषः परिष्काराणाम् उपयुक्तः समयः अस्ति। अस्माभिः सर्वकारः परिस्थितीनां मृगया न भवितुं दातव्यः।

प्रत्येकं सङ्कटं स्वेन सह शिक्षणस्य अवसरम् आनेतम्। एतत् दुर्भाग्यपूर्णं प्रकरणं केवलं दोषारोपणं वा राजनैतिक-विजयस्य उत्सवं यावत् सीमितं न भवेत्। अस्य स्थाने एतत् व्यापक- शिक्षा-परिष्काराणां माध्यमं भवेत्, येन संस्थागता निष्ठा सुदृढा भवेत्, नैतिकव्यवहारः प्रोत्साहनं लभेत्, अनावश्यकः शैक्षणिकप्रभावः न्यूनः भवेत्, अधिक-सुदृढायाः, न्यायसङ्गतायाः, मानवीयायाः च शिक्षाव्यवस्थायाः निर्माणं भवितुं शक्येत।

केचन राजनैतिक-दलानि सी.जे.पी. नेतारश्च अस्य घटनाक्रमस्य स्वकीय-विजयरूपेण उत्सवं मानयन्तः सन्ति। केचन राजनीतिज्ञाः सिक्थदीपयात्रा (कैंडल-मार्च) निष्कासनाय आह्वानं कुर्वन्तः सन्ति। एतदपि राजनीति-प्रकारः एव। सहमतितः परं केनापि दलेन निन्दायाः सङ्घर्षस्य च राजनीतिः न करणीया। तेषाम उद्देश्यं व्यवस्थायाः परिष्कारः न, अपि तु व्यवस्थायाः अस्थिरीकरणम् प्रतीयते। अस्माभिः तेषां प्रयासाः सफलाः न भवितुं दातव्याः। अस्माभिः स्वराष्ट्रस्य स्वकीय- युवसन्ततयः च भविष्यस्य रक्षणं करणीयं भविष्यति। अहं प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः नेतृत्वयुक्तेन सर्वकारेण गृहीतानां तेषां सोपानानां प्रशंसां करोमि, येषु ते स्वकीयवचनानुसारम् व्यक्तिगतप्रतिष्ठायाः उपरि "राष्ट्रं प्रथमम्" इति स्थानं दत्तवन्तः। ते सम्पूर्णदेशस्य कृते एकम् अनुकरणीयम् उदाहरणं प्रस्तुतवन्तः सन्ति।

# मुख्यमन्त्रिणः कार्यक्रमे NIC-संस्थायाः तकनीकी-सहयोगः



**हिमसंस्कृतवार्ताः- सत्येन्द्रपाठकः लखनऊ।** उत्तरप्रदेशस्य बहराइच-जनपदे तेजवापुर- विकास-खण्डस्य बेडनापुरग्रामे आयोजिते माननीयमुख्यमन्त्रिणः योगी आदित्यनाथ- महोदयस्य कार्यक्रमे राष्ट्रियसूचना-विज्ञानकेन्द्रेण बहराइच-शाखया तकनीकीसहयोगः प्रदत्तः। अस्मिन् कार्यक्रमे १९ विकासपरियोजनानां लोकार्पणं ५२ परियोजनानां शिलान्यासश्च सम्पन्नः।जिलाप्रशासनेन राष्ट्रिय-सूचना- विज्ञान- केन्द्राय निर्बाध- अन्तर्जाल-संयोजनस्य, प्रत्यक्षप्रसारणस्य तथा श्रव्य-दृश्य-समन्वयस्य दायित्वं प्रदत्तम्। जिला-सूचना-विज्ञान-अधिकारी योगेशकुमार-यादव महोदयस्य नेतृत्वे दलस्य सदस्यैः सर्वाः तकनीकीव्यवस्थाः समये एव सुनिश्चिताः। अपर-जिलासूचनाविज्ञान- अधिकारी दीपककुमारः, नेटवर्क- फील्ड-अभियन्तारौ रमणकुमारगुप्तः संदीप त्रिवेदी च कार्यक्रमस्य सफलसञ्चालने महत्त्वपूर्णं योगदानम् अददुः। सीमितसंसाधनेष्वपि कार्यक्रमस्य तकनीकीसञ्चालनं निर्विघ्नतया सम्पन्नम्। एतेन राष्ट्रिय-सूचना- विज्ञानकेन्द्रेण डिजिटल- प्रशासनस्य ई-शासनस्य च सुदृढीकरणे स्वकीयं महत्त्वपूर्णं योगदानं पुनः प्रदर्शितम्।

# धन्यो महाप्रभुस्तव सुमहिमा सुखशान्तिमयः परानन्दभूमा



अहो तव लीला नीलाद्रिनिवासी
तावके दर्शने धन्या मे हि दृशिः
रथे समासीनः प्रचलसि मुदा
भक्तेभ्यो दर्शनं ददासीह सदा ।१।
घर्घरनादेन चलति सुरथः
प्रकम्पितः किल स्वर्गश्चापि मर्त्यः
वडदाण्डे तदा लोकमस्तमालम्
आकाशे नवीननीरदमण्डलम् ।२।
अभिनव-जलधर-सुन्दरोऽसि
चतुर्धाविग्रहे परमसन्तोषी
दक्षिणामूर्तिस्त्वं दृश्यसे शोभनः
रथे समासीनश्चलसि वामनः ।३।
हस्त-पाद-कर्णा नहि तव सन्ति
सर्वाश्चर्यमयस्सुतरां विभासि
एतादृशो देवो जगतीह नास्ति
जप्त्वा नाम तव मच्चित्ते सुशान्तिः ।४।
त्वं रक्षां कुरुषे आह्वानमात्रके
रोमाञ्चनं किल भवति मे गात्रे
खेलसि सच्चिदानन्दसुविहारः
जले स्थले किल सञ्चरसि सारः ।५।
श्रद्धावालुकासु प्रधावति रथः
तं दृष्ट्वा नश्यति मे हि जन्मपथः
अन्ते तु प्रार्थना ममेयं विश्वेश
चरणयोस्तव भवामि विशेषः ।६।
घटेष्वापूर्यते मधुरं हि पानम्
अधरस्पर्शनात्तोषयति प्राणम्
रथस्योपरि भज्यन्ते कुम्भकाः
भुवि च तृप्यन्ति भूतानि राक्षसाः ।७।
पञ्च ते कुम्भकाः पानमत्तकराः
आम्राणां रसेन मिष्टस्वादुभराः
अधरप्रसादे परिपूर्णमताः
चण्डिकाद्याः पीत्वा भवन्ति संतृप्ताः।८।
दृश्यसे चिन्मयस्सुनीलसुन्दरः
मनसि वचने अहो विभास्वरः
धन्यो महाप्रभुस्तव सुमहिमा
सुखशान्तिमयः परानन्दभूमा ।९।

**रचयिता- आचार्यः डॉ. रुरुकुमारमहापात्रः**
**राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः**



# "अकबर बीरबल कथा"

एकस्मिन् दिने सम्राट् अकबरः स्वराज्ञ्या सह आलिन्दे उपविष्टः आसीत्। तस्मिन् समये राज्ञी उक्तवती, त्वं मम भ्रातरं प्रमुखसचिवं कृत्वा बीरबलं राज्यात् बहिः प्रेषयतु। अकबरः स्वपत्न्याः इच्छां पूर्णं कृतवान् किन्तु राज्ञ्याः भ्राता बुद्धिमान् नासीत्। तस्मिन् समये केनचित् दूरतः वृषभशकटस्य शब्दः श्रूयते स्म। अकबरः स्वश्यालकम् अवदत्- गत्वा पश्यतु एतानि कस्य वृषभशकटाः सन्ति, कुत्र गच्छन्ति इति। श्यालः तत्क्षणमेव गत्वा पुनः आगत्य महाराजं न्यवेदत् यत् वृषभशकटाः कस्यचित् व्यापारिणः सन्ति। अकबरः पृष्टवान् यत् तस्मिन् शकटे किं सामग्रीम् अस्ति? राज्ञ्याः भ्राता पुनः गत्वा पुनः आगत्य अवदत्- शकटे काश्मीरी कालीनाः सन्ति। अकबरः तृतीयं प्रश्नं पृष्टवान् यत् ते सर्वे वृषभशकटाः कुत्र गच्छन्ति? श्यालकः भ्रान्तः भूत्वा उक्तवान् अहं पृष्ट्वा आगमिष्यामि इति। श्यालकः गमनात् पूर्वं बीरबलः तत्र आगतः,अकबरेण बीरबलम् अपि एतदेव प्रश्नं पृष्टवान्। बीरबलः बहिः गत्वा किञ्चित्कालानन्तरं पुनः आगत्य अवदत्- महाराज पञ्चाशत् वृषभशकटाः सन्ति सर्वे शकटाः कश्मीरस्य प्रसिद्धव्यापारिणः रामदासमहोदयस्य अस्ति तथा शकटे मौल्यवान कालीनाः, पश्मिनाराङ्कवा/ और्णप्रावारकाः च सन्ति। सः एतानि वस्तूनि प्रतिवेशि राज्यं प्रति नयति। अद्य रात्रौ अस्माकं राज्ये स्थातुम् अहं तं प्रार्थितवान्, एतानि सर्वाणि वस्तूनि अस्माकं मुख्यविपण्ये प्रदर्शयितुम् अहं अनुरोधं कृतवान्। तत्सर्वं दृष्ट्वा श्रुत्वा च राज्ञी तथा च तस्या भ्राता तूष्णीम् अतिष्ठताम्। उभौ मौनम् अभवताम्। यस्य कार्यम् अस्ति सः एव तत् कर्तुं शक्नोति।

**डा. वर्षा प्रकाश टोणगांवकर ®© पुणे/ महाराष्ट्रम्**



# संस्कृतगीतम्

**"गृहस्थोऽस्मि ग्रामीण क्षेत्रे वसामि"**

नाहं श्रीकृष्णः न हस्तवेणुः,
तथापि मम द्वार एका च धेनुः।
प्रकृत्या तु सरलोऽस्मि कृष्णं भजामि,
गृहस्थोऽस्मि ग्रामीणक्षेत्रे वसामि।।

मम धेनु खादति शालि-पलालम्,
हरित- तृणानां स्वादुनि कवलम्।
शाकापशिष्टं स्थाल्याः शेषम्,
ददाति दुग्धं मह्यं च मधुरम्।।

दधि- नवनीत- घृतं च शुद्धम्,
दिवसेषु तक्रं रात्रिषु दुग्धम्।
प्रसन्न मनसा नित्यं पिबामि,
गृहस्थोऽस्मि ग्रामीण क्षेत्रे वसामि।।

रिक्तो न क्षेत्रे चरागाह शून्यम्,
वृक्षस्य छाया न एकं तड़ागम्।
तथापि धेन्वै सेवा ददामि,
गृहस्थोऽस्मि ग्रामीण क्षेत्रे वसामि।।

**मोती प्रसाद साहू**
**संस्कृत -शिक्षकः**
**अटल आवासीय विद्यालय गुरमुरा सोनभद्रः**

**प्रथमपृष्ठादग्रे...**

प्रधानमन्त्री अकथयत् यत् अस्मिन् मासे भौतिकी-रसायन-जीवविज्ञान-गणितेषु 'ओलंपियाड'-स्पर्धा आयोजिता, यस्याम् भारतीयैः उत्कृष्टं प्रदर्शनं कृतम्। भौतिकी-ओलंपियाड-स्पर्धायां भारतस्य सर्वे पञ्च छात्राः स्वर्णपदकानि जितवन्तः। प्रधानमन्त्री प्रसन्नतां प्राकटयत् यत् विगत-दशके भारतीय-छात्रैः प्रत्येकस्मिन् भौतिकी-ओलंपियाड-स्पर्धायां स्वर्णं रजतं वा जितम् अस्ति। रसायन-ओलंपियाड-स्पर्धायाम् अपि भारतस्य सर्वे छात्राः स्वर्णानि जितवन्तः। श्रीमोदी अकथयत् यत् एतत् भारतस्य अद्यावधि श्रेष्ठतमं प्रदर्शनम् अस्ति। भारतस्य सर्वे छात्राः जीवविज्ञान-ओलंपियाड-स्पर्धायाम् अपि एक-स्वर्ण-सहितम् पदकानि जितवन्तः। गणित-ओलंपियाड-स्पर्धायां भारतीय-छात्रैः द्वे स्वर्णे चत्वारि रजतानि च जितानि। प्रधानमन्त्री अकथयत् यत् तस्मै देशस्य युवा-शक्तौ गर्वः अस्ति। प्रधानमन्त्री काश्मीरे, सरकण्ड-धान्य-तृणाभ्यां निर्मीयमाणायाः 'वागु'-कटाह्याः (चटाई) चर्चाम् अकरोत्। अस्याः प्रारम्भः काश्मीरस्य जलप्राय-क्षेत्रेभ्यः तृणानाम् सरकण्डानाम च कर्तनेन भवति। श्रीमोदी अकथयत् यत् द्वाभ्यां शिल्पकारिभ्याम् एकां कटाह्यां निर्मातुं प्रायः चत्वारि दिनानि लगन्ति। सः अकथयत् यत् अस्याः कटाह्याः उपयोगे गतेषु कतिपयेषु वर्षेषु न्यूनता आगता आसीत्। किन्तु तदा श्रीनगरस्य गुलाम हुसैनः तस्य पुत्री तञ्जिला च 'वागु'-कलां पुनरुज्जीवयितुं सङ्कल्पं गृहीतवन्तौ। तयोः अस्मिन् कार्ये स्थानीय-सर्वकारात् अपि सहयोगः प्राप्तः, अधुना च एषा हस्तकला तीव्रगत्या देशस्य अन्येषु भागेषु अपि प्राप्नोति।



**हिमसंस्कृतवार्ताः, ईदरधीररजः**

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। मार्गे एकेन नर- मर्कटकेन यानप्रवाहः अवरुद्धः, एकः असहायः जनः च रक्षितः।

**नन्दिनी-** अहो! तेन उत्तमं कार्यं कृतम्। देहलीनगरे व्यायामस्पर्धायाम् एकया स्त्रिया 'चणकपूरिकाभक्ष्यम्' इति लिखितं फलकं प्रदर्शितम्।

**काव्या-** तत् तु हास्यकरम्! धावकेभ्यः सम्यक् प्रेरणा दत्ता। किन्तु श्मशाने कर्मकरैः चित्रग्राहके एकः अमानुषः जलभ्रमः गृहीतः।

**नन्दिनी-** भयङ्करम्! अहम् तत् चलचित्रं दृष्टवती अस्मि! अन्ते, एकः त्रिंशदधिक-शतवर्षीयः मकरः राष्ट्रिय-पाठ्यपुस्तकेषु सम्मानितः।

**काव्या-** सत्यम्। ग्रामवासिभिः तस्मै पशु-वृद्धाय महान् आदरः दर्शितः। अद्यतनाः वार्ताः अतीव विचित्राः।